तस्मै प्रोवाच भगवानायुर्वेदं शतक्रतुः । पदैरल्पैर्मतिं बुद्ध्वा विपुलां परमर्षये । हेतुलिङ्गौषधज्ञानं स्वस्थातुरपरायणम् । त्रिसूत्रं शाश्वतं पुण्यं बुबुधे यं पितामहः । सोऽनन्तपारं त्रिस्कन्धमायुर्वेदं महामतिः । यथावदचिरात् सर्व्वं बुबुधे तन्मना मुनिः । तेनायुरमितं लेभे भरद्वाजः सुखान्वितम् । ऋषिभ्योऽनधिकं तन्तु शशासानवशेषयन् । ऋषयश्च भरद्वाजाज्जगृहुस्तं प्रजाहितम् । दीर्घमायुश्चिकीर्षन्तो वेदं वर्द्धनमायुषः । तेनर्षयस्ते ददृशुर्यथावज्ज्ञानचक्षुषा । सामान्यञ्च विशेषञ्च गुणान् द्रव्याणि कर्म च । समवायञ्च तज्ज्ञात्वा तन्त्रोक्तं विधिमास्थिताः । लेभिरे परमं शर्म जीवितञ्चाप्यनश्वरम् । अथ मैत्रीपरः पुण्यमायुर्वेदं पुनर्व्वसुः । शिष्येभ्योदत्तवान् षड्भ्यः सर्व्वभूतानुकम्पया । अग्निवेशश्च भेड़श्च जातूकर्णः पराशरः । हारीतः क्षारपाणिश्च जगृहुस्तन्मुनेर्वचः । बुद्धेर्व्विशेषस्तत्रासीन्नोपदेशान्तरं मुनेः । तन्त्रस्य कर्त्ता प्रथममग्निवेशोयतोऽभवत् । अथ भेड़ादयश्चक्रुः स्वं स्वं तन्त्रं । कृतानि च । श्रावयामासुरात्रेयं सर्षिसङ्घं सुमेधसः । श्रुत्वा च सूत्रमर्थानामृषयः पुण्यकर्म्मणाम् । यथावत् सूत्रितमिति प्रहृष्टास्तेऽनुमेनिरे" । एवमायुर्वेदवंशमुक्त्वा तस्य निरुक्तिस्तत्र दर्शिता यथा "हिताहितं सुखं दुःखमायुस्तस्य हिताहितम् । मानञ्च तच्च यत्रोक्तमायुर्वेदः स उच्यते । शरीरेन्द्रिसत्त्वादिसंयोगधारिजीवितम् । नित्यगश्चानुबन्धश्च पर्य्यायैरायुरुच्यते । तस्यायुषः पुण्यतमो वेदो वेदविदां मतः । वक्ष्यते यन्मनुष्याणां लोकयोरुभयोर्हितः" ।

एवं बहूनामायुर्वेदानां सत्त्वेऽपि तेषां विरलप्रचारतया लुप्तप्रायत्वात् सुश्रुतचरकयोर्लोके प्रचाराच्च तत्तत्विषयास्तावत् संक्षेपेणोच्यन्ते । तत्र सुश्रुतस्यायुर्वेदस्याष्टाङ्गत्वम् तच्च अष्टाङ्गशब्दे ५२३ पृष्ठे शल्यं शालक्यमित्यादि दर्शितम् । तच्छास्त्रस्य प्रयोजनं रोगचिकित्सा सा च पुरुषविषयैवेति पुरुषस्वरूपतदुत्पत्तिगर्भादिक्रमेणाभिधाय तदीयशरीरसंस्थानं रोगनिदानरोगोपशमनद्रव्यादीनि क्रमेणोक्तानि । तदेतत् संक्षेपेण सुश्रुते उक्तम् "अस्मिन् शास्त्रे पञ्चमहाभूतशरीरिसमवायः पुरुषः इत्युच्यते । यस्मिन् क्रिया सोऽधिष्ठानम्, कस्मात् ? लोकस्य द्वैविध्यात् । लोको हि द्विविधः स्थावरो जङ्गमश्च । द्विविधात्मक एवाग्नेयः सौम्यश्च तद्भूयस्त्वात् । पञ्चात्मको वा । तत्र चतुर्व्विधो भूतग्रामः स्वेदजाण्डजोद्भिज्जजरायुजसंज्ञः । तत्र पुरुषः प्रधानं तस्योपकरणमन्यत् । तस्मात् पुरुषोऽधिष्ठानम् । तद्दुःखसंयोगा व्याधय इत्युच्यन्ते । ते चतुर्व्विधा आगन्तवः शारीरा मानसाः स्वाभाविकाश्चेति । तेषामागन्तवोऽभिघातनिमित्ताः । शारीरास्त्वन्नपानमूला वातपित्तकफशोणितसन्निपातवैषम्यनिमित्ताः । मानसास्तु क्रोधशोकभयहर्षविषादेर्ष्याभ्यसूयादैन्यमात्सर्य्यकामलोभप्रभृतय इच्छाद्वेषभेदैर्भवन्ति । स्वाभाविकाः क्षुत्पिपासाजरामृत्युनिद्राप्रभृतयः । त एते मनःशरीराधिष्ठानाः । तेषां संशोधनसंशमनाहाराचाराः सम्यक् प्रयुक्ताः निग्रहहेतवः । प्राणिनां पुनर्मूलमाहारो बलवर्णौजसाञ्च । स षट्सु रसेष्वायत्तो रसाः पुनर्द्रव्याश्रयाः । द्रव्याणि पुनरोषधयस्ताः द्विविधाः स्थावरा जङ्गमाश्च । तासां स्थावराश्चतुर्व्विधाः । वनस्पतयो वृक्षा वीरुध ओषधय इति । तास्वपुष्पाः फलवन्तो वनस्पतयः । पुष्पफलवन्तो वृक्षाः । प्रतानवत्यः स्तम्बिन्यश्च वीरुधः । फलपाकनिष्ठा ओषधय इति । जङ्गमास्त्वपि चतुर्विधा जरायुजाण्डजस्वेदजोद्भिज्जाः । तत्र पशुमनुष्यव्यालादयो जरायुजाः । खगसर्पसरीसृपप्रभृतयोऽण्डजाः । कृमिकीटपिपीलिकाप्रभृतयः स्वेदजाः । इन्द्रगोपमण्डूकप्रभृतय उद्भिज्जाः । तत्र स्थावरेभ्यस्त्वक्पत्रपुष्पफलमूलकन्दनिर्य्यासस्वरसादयः प्रयोजनवन्तो जङ्गमेभ्यश्चर्म्मनखरोमरुधिरादयः । पार्थिवाः सुवर्णरजतमणिमुक्तामनःशिलामृत्कपालादयः । कालकृतास्तु प्रवातनिवातातपच्छायाज्योत्स्नातमःशीतोष्णवर्षाहोरात्रपक्षमासर्त्त्वयनादयः संवत्सरविशेषाः । त एते स्वभावत एव दोषाणां सञ्चयप्रकोपप्रशमप्रतीकारहेतवः प्रयोजनवन्तश्च । भवन्ति चात्र । शारीराणां विकाराणामेष वर्गश्चतुर्व्विधः । चये कोपे शमे चैव हेतुरुक्तश्चिकित्सकैः । आगन्तवश्च ये रोगास्ते द्विधा निपतन्ति हि । मनस्यन्ये शरीरेऽन्ये तेषान्तु द्विविधा क्रिया । शरीरपतितानान्तु शारीरवदुपक्रमः । मानसानान्तु शब्दादिरिष्टो वर्गः सुखावहः । एवमेतत् पुरुषो व्याधिरौषधं क्रियाकाल इति चतुष्टयं समासेन व्याख्यातम् । तत्र पुरुषग्रहणात्तत्सम्भवद्रव्यसमूहो भूतादिरुक्तस्तदङ्गप्रत्यङ्गविकल्पाश्च त्वङ्मांसशिरास्नायुप्रभृतयः । व्याधिग्रहणाद्वातपित्तकफशोणितसन्निपातवैषम्यनिमित्ताः सर्व्व एव व्याधयो व्याख्याताः । ओषधिग्रहणात् द्रव्यगुणरसवीर्य्यविपाकप्रभावाणामादेशः । क्रियाग्रहणाच्छेद्यादीनि स्नेहादीनि च कर्म्माणि व्याख्यातानि । कालग्रहणात्सर्व्व-